किल भाद्रपदेऽर्कसंक्रान्तिर्जाता ततोऽर्कगतेरधिकत्वान्मार्गशीर्षे द्विसंक्रान्तिः । ततः पुनर्गतेरल्पत्वाच्चैत्रोऽप्यसंक्रान्तिर्भवति । ततो वर्षमध्येऽधिमासद्वयमित्युपपन्नम्" प्रमिता० । मेषादिषु सूर्य्यस्य गतिभेदात् भोगकालस्तावद्दिनादिक मुच्यते

| मे | वृ | मि | क | सि | क | तु | वृ | ध | म | कु | मी |
|---|---|---|---|---|---|---|---|---|---|---|---|
| ३० | ३१ | ३१ | ३१ | ३१ | ३० | २९ | २९ | २९ | २९ | २९ | ३० |
| ५५ | २४ | ३७ | २८ | २ | २९ | ५७ | २७ | १५ | २४ | ४९ | २९ |
| ३३ | ५६ | ३२ | ३५ | ५२ | ४ | २ | ३९ | ३ | ० | ४३ | ३१ |

"इदानीं गणकानां प्रतीत्यर्थं क्षयमासकालान् गतागतान् कतिचिद्दर्शयति स्म" प्रमिता० ।

"गतोऽब्ध्यद्रिनन्दै ९७४ र्मिते शाककाले तिथीशै १११५ र्भविष्यत्यथाङ्गाक्षसूर्यैः १२५६ । गजाद्र्यग्निभूमि १३७८ स्तथा प्रायशोऽयं कुवेदेन्दु १४१वर्षैः क्वचिद्गोकुभिश्च १९ ।

"स्पष्टम् । अत्रोपपत्तिः । यदा किलैकविंशतिः शुद्धिस्तदा भाद्रपदोऽधिमासः । तस्मिन् जाते कार्त्तिकादित्रये क्षयमासः संभाव्यते । सा च तथाविधा शुद्धिः कुवेदेन्दु १४१ वर्षान्तरे काले पुनर्भवति । किन्तु सत्रिभागाभिः षड्भिर्घटिकाभिरधिका भवति । कदाचिदेकोनविंशत्या वर्षैस्तादृशी भवति । तत्र त्रिभागोनाभिश्चतुर्दशघटिकाभिरधिका भवति । कुवेदेन्दुवर्षेभ्यस्त्वेकोनविंशतिवर्षेभ्यो द्विधावद्धा द्विराशैः खराशैश्च भक्ता इत्यादिना लब्धेष्वधिमासेषु शेषतिथिषु शून्यं प्रथमस्थाने सत्र्यंशाः षड्घटिकाः स्युः ६ । २० । द्वितीये त्रिभागोनाश्चतुर्द्दश १२ । ४० । अत उक्तं प्रायशोऽयं कुवेदेन्दुवर्षैः क्वचिद्गोकुभिश्चेति । प्रागागतश्चेत्यर्थादुक्तं स्यात्" प्रमिता० ।

कालमा० उक्तं सि०शि० वाक्यं व्याख्याय विशेषोऽभिहितः "स्फुटमानेन योऽयमसंक्रान्तः सः स्फुटोऽधिमासः तेनैव मानेन यो द्विसंक्रान्तियुक्तः स क्षयाख्यः स च कार्त्तिकमार्गशीर्षपौषेष्वेव त्रिष्वन्यतमो भवति नान्येषु माघादिषु नवसु एवंविधक्षयमासयुक्ते वर्षे क्षयमासात् पूर्वेषु त्रिषु मासेषु मध्ये कश्चिदधिमासो भवति क्षयमासादूर्द्ध्वमपि मासत्रयमध्येऽपरोऽधिमासः । तदेवंविधमेकवर्षस्थं मलमासद्वयं चिरेण कालेन यदा कदाचिदायाति नत्वेकाधिमासवत् पुनः पुनः क्षयमासः समायाति तदित्यागमनकालः सिद्धान्तशिरोमणौ दर्शितः । "गतोऽब्ध्यद्रीत्यादि (वाक्यं प्रागुदाहृतम्) अस्यायमर्थः । चतुःसप्तत्यधिकनवशतसंख्याकैर्वर्षैः परिमिते शाककाले कश्चिदुक्तमासत्रयोपेतो वत्सरोगतः । यथोक्तसंख्या चाब्ध्यद्रिनन्दैरित्यनेन पदेन विवक्षिता । अब्धयश्चत्वारः अद्रयः सप्त नन्दा नव । एतत्संख्यात्रयगमका अङ्का गणकप्रसिद्ध्या प्रातिलोम्येन लिखिता यथोक्तसंख्यायां पर्य्यवस्यन्ति । तिथीशैरित्यत्रापि तिथयः पञ्चदश ईशा एकादश तत्र गणकैरङ्केषु प्रक्षिप्तेषु पञ्चदशाधिकशतयुक्तसहस्रसंख्या सम्पद्यते । तावद्भिः शकवर्षैर्मिते काले, कश्चिदुक्तमासत्रययुतः संवत्सरः । अङ्गाक्षसूर्य्यैरित्यत्राङ्गानि षट् अक्षाणीन्द्रियाणि पञ्च सूर्य्या द्वादश तत्राङ्कप्रक्षेपे षट्पञ्चाशदधिकशतद्वयोपेतसहस्रसंख्या सम्पद्यते । तावद्भिर्वत्सरैर्मिते शककाले यथोक्तमासत्रयोपेतः कश्चित्संवत्सरः । तस्य चोदाहरणम् । पूर्व्वोदाहृत ईदृश संवत्सरः प्राचीनोभावी वा संवत्सरः । तत्र भाद्रपदकृष्णामावास्यायां कन्यासंक्रान्तिस्तत ऊर्द्ध्वम् असंक्रान्तमेकमासमतीत्य उत्तरयोर्मासयोः क्रमेण तुलावृश्चिकसंक्रान्ती तत ऊर्द्ध्वमेकस्मिन्नेव मासे शुक्लप्रतिपदि धनुःसंक्रान्तिः तत ऊर्द्ध्वं दर्शे मकरसंक्रान्तिः । तत ऊर्द्ध्वं कुम्भसंक्रान्तिः समनन्तरे मासे दर्शे । तत ऊर्द्ध्वं असंक्रान्तिमासमतीत्योत्तरस्यां शुक्लप्रतिपदि मीनसंक्रान्तिरेवं च एकस्मिन्नेव वत्सरे द्वावसंक्रान्तौ मासौ एको द्विसंक्रान्तिमास इति यथोक्तमासत्रयं सम्पद्यते । गजाद्र्यग्निभूमिरित्यत्रापि गजा अष्टौ, अद्रयः सप्त, वह्नयस्त्रयः भूरेका तत्राङ्कप्रक्षेपे सत्यष्टसप्तत्यधिकशतत्रयोपेतसहस्रसंख्या सम्पद्यते । तावद्भिर्वत्सरैर्मिते शाककाले कश्चिदुक्तविधः सम्पत्स्यते वत्सरः । कुवेदेन्दुवर्षैरित्यत्र कुरेकः वेदाश्चत्वार इन्दुरेकस्तत्राङ्कप्रक्षेपेणैकचत्वारिंशदधिकशतसंख्या भवति एतावद्भिर्वर्षैः क्वचित्पूर्व्वोक्तक्षयमासयोर्व्यवधानं भवति गोकुभिश्चेत्यत्र नपुंसकवर्जितेषु स्वरान्तेषु गकारस्थानेष्वोकारो नवमः सम्पद्यते । कुरेका तत्राङ्कप्रक्षेपे सति एकोनविंशतिर्भवति तावद्भिर्वत्सरैः क्वचित्पूर्वोक्तयोः क्षयमासयोर्व्यवधानमिति । अत्र द्विसंक्रान्तियुक्तस्य क्षयसंज्ञायामुपपत्तिरुच्यते । यदा धनुःस्थे रवौ दर्शपूर्त्तिस्तदा तस्य मेषादिस्थवचनेन मार्गशीर्षत्वं प्राप्तम् । तथा सति पूर्वोदाहृते द्विसंक्रान्ते मासे धनुःस्थे रवौ दर्शो न समाप्तः मकरस्थे तु रवौ समाप्तः । अतः पौषमासत्वं तस्य सम्पन्नम् । तथा च मार्गशीर्षस्य तत्र लुप्तत्वात् तस्य क्षयसंज्ञा युक्ता । अत एवैकमास-